पः कृत्स्नश्च । ) कलादिकं कर्म्म । इत्यमरः ॥ हुनर इति पारसीकभाषा । कारीगरी इति हिन्दीभाषा ॥ वात्स्यायनोक्तनृत्यगीतवाद्यादि-चतुःषष्टिः बाह्यक्रियाः तथा आलिङ्गनचुम्ब-नादिचतुःषष्टिः अभ्यन्तरक्रियाः कलाः । आदिना स्वर्णकारादिकारुकर्म्मग्रहः । एतत् सर्व्वं शिल्पं कथ्यते । इति तट्टीकायां भरतः ॥ (यथा कथासरित्सागरे । २५ । १७५ ।
"ते तन्निरूप्य जगदुर्नेदृशो देव शक्यते ।
अपरः कर्त्तुमेतद्धि दिव्यं शिल्पं न मानुषम् ॥")
स्रुवः । इति मेदिनी ॥

शिल्पकारः, पुं, (शिल्पं करोतीति । कृ + अण् ।) शिल्पी । शिल्पविद्याव्यवसायी । कारिकर इति भाषा । शिल्पं करोति इत्यर्थे अण्प्रत्ययेन निष्पन्नः ॥

शिल्पकारी, [न्] त्रि, (शिल्पं कर्त्तुं शीलमस्य । णिनिः ।) शिल्पकर्म्मकर्त्ता । तस्योत्पत्त्यादि यथा,—
"विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्त्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षड़ेते शिल्पिनां वराः ॥
सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च ।
पतितास्ते ब्रह्मशापादजात्या वर्णसङ्कराः ॥
स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम ।
बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा ॥
सूत्रधारो द्विजातीनां शापेन पतितो भुवि ।
शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥
व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा ।
पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः ॥
कश्चिद्वणिग्विशेषश्च संसर्गात् स्वर्णकारिणः ।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

शिल्पशाला, स्त्री, क्ली, ( शिल्पानां शाला । ) स्वर्णकारादीनां कर्म्मगृहम् । कारखाना इति पारसीकभाषा । तत्पर्य्यायः । आवेशनम् २ । इत्यमरः ॥ शिल्पशाला ३ शिल्पशालम् ४ शिल्पिशालम् ५ । इति तट्टीका ॥

शिल्पशास्त्रं, क्ली, (शिल्पस्य शास्त्रम् ।) शिल्प-कर्म्मग्रन्थः । तच्छास्त्राणि बहूनि सन्ति तन्मध्ये वास्तुशास्त्रैकं लिख्यते । यथा,—
"स्त्रीपुत्त्रादिकभोगसौख्यजननं धर्म्मार्थकामप्रदं
जन्तूनां लयनं सुखास्पदमिदं शीताम्बुघर्म्मापहम् ।
वापीदेवगृहादिपुण्यमखिलं गेहात् समुत्पद्यते
गेहं पूर्व्वमुशन्ति तेन विबुधाः श्रीविश्वकर्म्मादयः ॥
सिंहे गृहारम्भमुशन्ति हृद्या
यथोदिते मासि वलक्षपक्षे ।
मृगाद्यवीर्य्ये सुदिने निमित्ते
शुभं रवौ सौम्यगते प्रवेशम् ॥
चैत्रे शोककरं गृहादि रचितं स्यान्माधवेऽर्थप्रदं
ज्यैष्ठे मृत्युकरं शुचौ पशुहरं तद्वृद्धिदं श्रावणे ।
शून्यं भाद्रपदेऽश्विने कलिकरं भृत्यक्षयं कार्त्तिके
धान्यं मार्गसहस्ययोर्दहनभीर्माघे श्रियः फाल्गुने ॥
आदित्ये हरिकर्कनक्रघटगे पूर्व्वापरास्यं गृहं
कर्त्तव्यं तुलमेषवृश्चिकवृषे याम्योत्तरास्यं तथा ।
द्वारं भिन्नतया करोति कुमतौ रोगार्थनाशस्तदा
कन्यामीनधनुर्गते मिथुनगे चास्मिन्न कार्य्यं गृहम ॥
कन्यादित्रिषु पूर्व्वतो यमदिशि त्याज्यस्तु चापादितो
द्वारं पश्चिमतस्त्रिके जलचरात् सौम्ये रवौ युग्मतः ।
यस्मात्तत्सम्मुखं दिशासु भवनं द्वारादिकं हानिकृत्
सिंहं वापि वृषञ्च वृश्चिकघटं वाते स्थितं सर्व्वतः ॥
प्राची मेषतुलारवावुदयति स्याद्दैवे वह्निभे
चित्रास्वातिभमध्यगा निगदिता प्राची बुधैः पञ्चधा ।
प्रासादो भवनं करोति नगरं दिङ्मूढमर्थक्षयं
हर्म्ये देवगृहे पुरे च नितरामायुर्धनं दिङ्मुखे ॥
तारे मार्कटिके ध्रुवस्य समतां नीते बले वैनते
दीपाग्रेण तदैक्यतश्च कथिता सूत्रेण सौम्या दिशा ।
शङ्कोर्नेत्रगुणेन ३६ मण्डलवरे छाया तयोर्मत्स्ययो-
र्जाता पत्रयुतिस्तु शङ्कुतलतो याम्योत्तरैस्तत्तुटेः ॥
राशौनामलिमीनसिंहभवनं पूर्व्वामुखं शोभनं
कन्याकर्कटनक्रराशिगृहिणां याम्याननं मन्दिरम् ।
राशेर्धन्वितुलायुगस्य सदनं शस्तं प्रतीचीमुखं
पुंसां कुम्भवृषाजराशिभजतां सौम्याननं स्याद्गृहम् ॥"*॥

अथ भूपरिग्रहः ।
"श्वेता ब्राह्मणभूमिका च घृतवद्गन्धा शुभास्वादिनी
रक्ता शोणितगन्धिनी नृपतिभूः स्वादे कषाया च सा ।
स्वादेऽम्ला तिलतैलगन्धिरुदिता पीता च वैश्या मही
कृष्णा मत्स्यसगन्धिनी च कटुका शूद्रेति भूलक्षणम् ॥
स्वादे भवेद्या मधुरा सिताभा
चतुर्षु वर्णेषु मही प्रशस्ता ।
स्नेहान्विता वभ्रुभुजङ्गयोर्या
सौहार्दवत्याश्वविड़ालयोर्व्वा ॥ * ॥
परीक्षितायां भुवि विघ्नराजं
समर्च्चयेत् चण्डिकया समेतम् ।
क्षेत्राधिपं चाष्टदिशाधिनाथान्
सुपुष्पधूपैर्बलिभिः सुखाय ॥
खातं भूमिपरीक्षणे करमितं तत् पूरयेत्तन्मृदा
हीने हीनफलं समे समफलं लाभो रजोवर्द्धिते ।
तत् कृत्वा जलपूर्णमाशतपदं गत्वा परीक्ष्यं पुनः
पादोनेऽर्द्ध विहीनकेऽथ निभृते मध्याधमेष्टाम्बुनि
भूमिः प्राक् प्रवणा च शङ्करककुप्सौम्याश्रितं सौख्यदं
वह्नौ वह्निभयं यमे च मरणं चौराद्भयं रक्षसि
वायव्ये प्रवणा च धान्यहरणं स्याच्छोकदं वारुणं
विप्रादेरनुवर्णतश्च सुखदं सृष्टिक्रमात् सौम्यतः
अग्नौ राक्षसवायुशङ्करदिशि स्थाप्याः क्रमात् कीलकाः
अश्वत्थात् खदिरात् शिरीषककुभात् वृक्षात् क्रमेण द्विजाः ।
वर्णानां कुशमुञ्जकाशशणजं सूत्रं क्रमात् सूत्रणे
निम्ना भूः स्फुटितोषरा विलवती शल्यैर्युता नाशुभा ॥"
ककुभादित्यत्र वकुलादिति च पाठः ॥*॥
"प्रश्नत्रयं वापि गृहाधिपेन
देवस्य वृक्षस्य फलस्य वापि ।
वाच्यं हि कोष्ठाक्षरसंयुतेन
सत्यं विलोक्यं भवनेषु स्रष्टा ॥
वा का चा टा ता ए ह सा पापवर्णाः
प्राच्यादिस्थे कोष्ठके शल्यमुक्तम् ।
केशाङ्गाराः काष्ठलोहास्थिकाद्यं
तस्मात् कार्य्यं शोधनं भूमिकायाः ॥
शल्यं गवां भूपभयं हयानां
रुजं शुनोऽत्वोः कलहप्रणाशौ ।
खरोष्ट्रयोर्हानिमपत्यनाशं
स्त्रीणामजस्याग्निभयं तनोति ॥*॥
कन्यादौ रवितस्त्रये फणिमुखं पूर्व्वादिसृष्टिक्रमं
ख्यातं वास्तुवपुर्दिशात्रयगतं लाङ्गूलपृष्ठं शिरः
द्वारं तस्य मुखे गृहादि भयदं कुक्षिद्वये सौख्यदं
दुःखं प्राक्खनने शिरोऽङ्घ्रिवपुषः कुक्षौ सुखं दक्षिणे ॥
प्राच्यां नागमुखं बुधैर्निगदितं भाद्राश्विने कार्त्तिके ।
मार्गात् फाल्गुनशक्रतः क्रमतया याम्ये जले चोत्तरे ।
चैत्रे चाष्टविभाजिते दिनकराद्द्वारान्लिखेत् कोष्ठगान्
मन्दाङ्गारकयोश्च तत्र फणिनः शारीरकं नो खनेत् ॥*॥
शीर्षे मातृपितृक्षयः प्रथमतः खाते रुजा पुच्छके
पृष्ठे हानिभये च कुक्षिखनने स्यात् पुत्त्रधान्यादिकम् ।